This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit. The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

Checked 2012

M-802

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र M 802 विषय न्यायशास्त्र

नाव. न्यायसिद्धान्तमुक्तावली (MSS.) ✓

लेखक/लिपीकार —

पृष्ठ 44 काळ — पूर्ण/अपूर्ण

M-802

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ भाषापरिच्छेदव्याख्याप्रारंभः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सापारि॰॥ श्रीगणेशाय नमः॥ श्रीदक्षिणामूर्तये नमः॥ चूडामणीकृतविधुर्वलयीकृतवासुकिः॥ भवो भवतु भव्याय लीलातां
डवपंडितः॥१॥ निजनिर्मितकारिकावलीमतिसंक्षिप्तचिरंतनोक्तिभिः॥ विशदीकरवाणि कौतुकान्ननु राजीवदयावशंभिः॥
वदः॥२॥ सद्द्रव्यागुणगुंभिफितासुकृतिनां सत्कर्मणां ज्ञापिका सत्सामान्यविशेषनित्यमिलिताभावप्रकर्षोज्ज्व
ला॥ [redacted] विष्णोर्वक्षसि विश्वनाथकृतिः सिद्धांतमुक्तावली विन्यस्ता मनसो मुदं वित ना४
नुतां रघुपतिः रेषां चिरं॥३॥ विघ्नविघातायकृतं मंगलं शिष्यशिक्षायै ग्रंथादौ निबध्नाति नूतनेति॥ ननु नमंगलं विघ्न
९ मंगलं ध्वंसं प्रति न वा समाप्तिं प्रति कारणं विनापि नास्तिकादीनां ग्रंथे निर्विघ्नपरिसमाप्तिदर्शनादिति चेन्न॥ अविगीतशिष्टाचा
८ मंगलस्य रविषयत्वेनैव सफलत्वे सिद्धे तत्र च फलजिज्ञासायां संभवति दृष्टफलकत्वे ऽदृष्टफलकल्पनायाः अन्याय्यत्वात् उपस्थित
त्वात्समाप्तिरेव फलं कल्प्यते॥ इत्थं च यत्र मंगलं न दृश्यते तत्रापि जन्मांतरीयं तत् कल्प्यते॥ यत्र सत्यपि मंगले समाप्तिर्न दृ
श्यते तत्र बलवत्तरो विघ्नो विघ्नप्राचुर्यं वा बोध्यं॥ प्रचुरस्यास्यैव बलवत्तरविघ्ननिवारणे कारणत्वं बोध्यं॥
विघ्नध्वंसस्तु मंगलस्य द्वारमित्याहुः॥ नव्यास्तु मंगलस्य विघ्नध्वंस एव फलं समाप्तिस्तु बुद्धिप्रतिभादि व्या॰रव्या

ग्रा
॥१॥

२

कारणकलापात्॥ नचैवं स्वतंत्रसिद्धविघ्नविरहवतां मंगलस्य निष्फलत्वापत्तिरिति वाच्यं॥ इष्टापत्तेः॥ विघ्नशं
कया तदाचरणात्॥ न चैवं शिष्टाचारात्॥ न च तस्य निष्फलत्वे तद्बोधकवेदाप्रामाण्यं॥ सति विघ्ने तन्ना
शस्यैव वेदबोधितत्वात्॥ अत एव पापभ्रमेण कृतप्रायश्चित्तस्य निष्फलत्वेपि [redacted] न तद्बोधकवेदाप्रामा
ण्यं मंगलं तु न विघ्नध्वंसविशेषे कारणं॥ विघ्नध्वंसविशेषे विनापकस्तवपाठादेः॥ क्वचिच्च विघ्नासत्ताभावे च
५ मात्र वसमाप्तिं प्रति कारणं॥ प्रतिबंधकसंसर्गाभावस्यैव कार्यजनकत्वात्॥ इत्थं च नास्तिकादीनां ग्रंथेषु जन्मांतरीमंग
लजन्यदुरितध्वंसस्य तत्सिद्धविघ्नासंताभावो वा इति न व्यभिचारः॥ इत्याहुः॥ संसारेति॥ संसार एव महीरु
प होवृक्षः तस्य बीजाय निमित्तकारणाय सर्वे॥ एतेन ईश्वरे प्रमाणमपि प्रदर्शितं भवति॥ [redacted] पादिका या७ टा७
र्यं कर्तृजन्यं कार्यत्वात्॥ तथा क्षित्यंकुरादिकमपि॥ न च तत्र कर्तृत्वमस्मदादीनां संभवति इत्यतस्तत्कर्तृत्वे
न ६ नेश्वरसिद्धिः॥ न च शरीराजन्यत्वेन कर्त्रजन्यत्वसाधकस्य सत्प्रतिपक्ष इति वाच्यं॥ अप्रयोजकत्वात्॥ मम तु कर्तृ न ४
त्वेन कार्यत्वेन कार्यकारणभावे तु कुलगुरुस्वर्गः॥ द्यावाभूमी जनयन्देव एको भुवनस्य भर्ता विश्वस्य मोसाद्
पी:२ इत्यः॥ आगमाश्चानुसंधेयाः॥ इदं मंगलं नतिरिति समस्तान्यभावत्वकल्पनादेव षण्णामभावत्वं प्रसज्येत न भावत्वेन प्र
गुपन्यासो न कृतः॥ एते च पदार्था वैशेषिकन्यायसिद्धान्ते व्यापिकानामप्यविरुद्धाः॥ प्रतिपादितं चैवमेव भा
द्रव्यं विभजते २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चिंता १ शक्ति १ र्थ १ न २

भाषारि० ।। ध्येऽत एव उपमानमपि नोक्तत्वपदार्थभिंनतयोर्हस्य योग्यतिरिक्तपदार्थमात्रशंक्ष्यते ।। ननु कथमेत एव पदार्थाः शक्तिसा स १

योः दृश्यादीनामतिरिक्तपदार्थत्वात् ।। तथाहि मण्यादिसमवहिते न वह्निना दाहो जन्यते न च दृश्येन तु जन्यते ।। तत्र मण्या

दिना वन्हेर्दाहानुकूला शक्तिर्नाश्यते ।। उत्तेजकेन मण्याद्यपसारणेन वा तत्र जन्यत इति [redacted] प्यते ।। एवं सोऽस्य मध्यतिरि द ३

क्तः पदार्थः ।। तद्भिन्न षड्भावे ध्वंत भर्वति सामान्येऽपि सत्तादृष्या गोत्वं नित्यं तथा धत्वमपि सादृश्य प्रतीतेः ।। [redacted] ति ४

[redacted] नाप्यभावो सत्वेन प्रतीयमानत्वादिति चेन्न ।। मण्याद्यभावविशिष्टवह्न्यादेर्दाहादिकं प्रति कारणत्वेन मण्याभावादेरेव

वास्यातं त्र्येण हेतुत्वं कल्प्यते अन्येनैव सामंजस्ये अनंतशक्तितत्प्रागभावध्वंसकल्पनागौरवात् ।। न चोत्तेजके सति ते ५

विशिष्ट मण्य भाव ५ तिबंधके सत्यपि दाहादर्शनाद् उत्तेजकाभावे स्य दाहकारणत्वात् ।। सादृश्यमपि न पदार्थांतरं किंतु तद्भि

न्नत्वे सति तद्गत भूयो धर्मवत्त्वं यथा चंद्रभिन्नत्वे सति चंद्रगताह्लादकत्वादिमत्वं मुखे चंद्रसादृश्यमिति ।। द्रव्याणि वि द ४

भजते क्षित्यादीनि ।। क्षितिः पृथिवी ।। आपो जलानि मरुद्वायुः व्योमाकाशं कालः समयः दिक्आशा आत्मा एतानि

द्रव्यपदं द्रव्यत्वरूपजाति विशिष्टार्थकबोध ।। २ = नव द्रव्याणीत्यर्थः ।। ननु द्रव्यत्वजातौ किं मानं ।। [redacted] न हि तत्र प्रत्यक्षं प्रमाणं घटत्वं तु जैः प्रभृति ते ज

बुद्धविलक्षणमहादिति चेन्न ।। कार्यसमवायिकारणतावच्छेदकतया संयोगस्य विभागस्य वा समवायिकारणतावच्छे व्याख्या

क्षित्यादीनि इति सूत्रं विहितं न क्षितिप्रत्यपार्थकमिति ... पृथिवीति ... समर्थमाह ... आपः इति

पिते न ... आत्माह ... मरुदिति ... तेजो वह्निः ... ज्योतिः ... शार्यते न तदेहि ... उपस्थितेराह ।। २ ।।

स

दकतया द्रव्यत्वजातिसिद्धेः ननु दर्शनादयं तमः कुतो नोक्तं ।। तद्भिन्नत्वे ग्राह्यत्वे ।। तत्र रूपवत्त्वात्कर्मवत्त्वाद्रूद्र स्य १

मत्वं ।। तत्र गंधशून्यतया न पृथिवी नीलरूपवत्त्वाच्च न जलादिकं तत्तस्य चा [redacted] लोकनिरपेक्षं चक्षुः कारणमिति चेन्न ।।

आवश्यकत्वात् [redacted] तेजो भावेनैवोपपत्तौ अभावांतरद्रव्यकल्पनायाः अन्याय्यत्वात् ।। रूपवत्ताप्रतीतिस्तु भ्रमरूपा कर्मवत्ता

प्रतीतिरपि आलोकापसरणोपाधिकी भ्रांतैव ।। तमसोऽतिरिक्तत्वे अनंतावयवादिकल्पनागौरवं च स्यात् ।।

सुवर्णस्य यथा तैजसत्वं तथा वक्ष्यते ।। गुणान् विभजते रूपगुणा इति ।। एते गुणाश्चतुर्विंशतिसंख्या

काः कणादेन कंठतः शब्देन च दर्शिताः ।। तत्र गुणत्वजातिसिद्धिस्तु अग्रे वक्ष्यते ।। कर्माणि विभजते ।। उत्क्षेपणे

ति ।। कर्मत्वजातिस्तु प्रत्यक्षसिद्धा ।। एवमुत्क्षेपणत्वादिकमपि ।। ननु भ्रमणादिकमपि पंचकर्माधिकतया कु

तो नोक्तमत [redacted] आह ।। भ्रमणमिति ।। सामान्यं निरूपयति सामान्यमिति ।। तल्लक्षणं तु नित्यत्वे सत्यनेकसमवे

तत्वं ।। अनेकसमवेतत्वं संयोगादीनामप्यस्ति अत उक्तं नित्यत्वे सतीति ।। नित्यत्वे सति समवेतत्वं गगनादिपरिमाणादी

पप नामस्त्यत उक्तं अनेकेति ।। नित्यत्वे सत्यनेकवृत्तित्वं अत्यंताभावेऽप्यस्ति ततो वृत्तिसामान्यं विहाय समवेतत्वमुक्तं ।। ए

कव्यक्तिमात्रवृत्तिस्तु न जातिः ।। तथा चोक्तं ।। व्यक्तेरभेदस्तुल्यत्वं संकरोऽथानवस्थितिः ।। रूपहानिरसंबंधो जाति

बाधक ।।

= सर्वतिव्वेसति सभिन्नत्व सजातीयवृत्तित्वाभ्यत्वं =

= ... सामान्य ... नित्वे सति ... सजातीय ... तुल्यत्व ।।

= परस्परात्यंताभावसमानाधिकरणयोर्धर्मयोरेकत्र समावेशः संकरः ।।

रि० परमितिपरमधिकदेशवृत्तित्वमपरं न्यूनदेशवृत्तित्वं।। अव्यक्तजातमपेक्ष्याव्यापकत्वात् अधिकदेशवृत्तित्वात्सत्तायाः परत्वं।। अन्यासां जातीनां
अपरत्वं।। व्यापकत्वादिति एवं च पृथिवीत्वाद्यपेक्ष्या व्यापकत्वादधिकदेशवृत्तित्वात्परत्वं।। सत्ताद्यपेक्ष्या व्याप्यत्वात् परत्वं।। विशेषस्य देशवृत्ति
त्वं निरूपयति।। अंत्यस्त्विति।। अंत्येष्ववसाने वर्तत इत्यंत्याः।। यदपेक्षया विशेषो नास्तीति भावः।। घटादीनां [redacted] द्व्यणुकपर्यं त्वात् इयत्व
नो।४ तानां तत्तदवयवभेदात्परस्परं भेदः परमाणूनां परस्परभेदको विशेष एव स तु स्वत एव व्यावृत्तः।। तेन तत्र विशेषांतरापेक्षा स्य.प्र
नास्तीति भावः।। समवायं दर्शयति।। घटादीनामिति।। अवयवावयविनोर्जातिव्यक्त्योर्गुणगुणिनोः [redacted] क्रियाक्रियाव
तोर्नित्यद्रव्यविशेषयोश्च यः संबंधः स [redacted] समवायः।। समवायत्वं नित्यसंबंधत्वं।। तत्र प्रमाणं तु गुणक्रियादिविशिष्टा
बुद्धिः विशेषणविशेष्यसंबंधविषया विशिष्टबुद्धित्वात् दंडी पुरुष इति विशिष्टबुद्धिवत्।। अनेनानुमानेन संयोगादि बा
न समवायसिद्धिः।। न च स्वरूपसंबंधेन सिद्धसाधनमर्थांतरं वा।। अनंतसंबंधानां स्वरूपत्वकल्पने गौरवात् एकसमवाय [redacted]स्वरूपाणां
सिद्धेः।। न च समवायस्यैकत्वे वायोरूपवत्ताबुद्धिप्रसंगः।। तत्र रूपसमवायसत्त्वेऽपि रूपाभावा[redacted]त्।। नन्वेवमभ दि
अभावस्यापि वैशिष्ट्यसंबंधांतरसिद्धिरिति वाच्यं।। तस्य नित्यत्वे भूतले घटानयनानंतरं घटाभावबुद्धिप्रसंगात्।। घटाभा मपि
वस्य तत्र सत्त्वात्।। तस्य च नित्यत्वात्।। अन्यथा देशांतरे तत्प्रतीतिर्न स्यात्।। वैशिष्ट्यस्य च तत्र सत्त्व सत्त्वात्।। मम व्याख्या

वं४ लाघवात् ४ प्रा

ग।३।।

घटेऽपाकरक्तदशायां श्यामरूपस्य नष्टत्वात् न तद्बुद्धिः।। वैशिष्ट्यस्यानित्यत्वे अनंत[redacted]शिष्ट्यकल्पने तवैव
गौरवात्।। इत्थं च तत्तत्कालीनतत्तद्भूतलादिकं तत्तदभावानां संबंधः।। अभावं विभजते।। अभावस्त्विति।। अ
भावत्वं द्रव्यादिषट्कान्योन्याभाववत्त्वं।। संसर्गेति संसर्गाभावान्योन्याभावभेदादित्यर्थः।। अन्योन्याभाव
स्यैकविधत्वात् तद्विभागासंभवात् संसर्गाभावं विभजते।। प्रागभावेति।। संसर्गाभावत्वं अन्योन्याभावभि
न्नाभावत्वं।। अन्योन्याभावत्वं तादात्म्यसंबंधावच्छिन्नप्रतियोगिताकाभावत्वं।। विनाश्यभावत्वं प्रागभावत्वं।। त्वं५
जन्याभावत्वं ध्वंसत्वं।। नित्यसंसर्गाभावत्वमत्यंताभावत्वं।। यत्र भूतलादौ [redacted] घटादिकमपसारितं पुनरानी
च घटकालस्य संबंधाघटकत्वात्।। अत्यंताभावस्य नित्यत्वे घटकालेऽपि न घटात्यंताभावबुद्धिः।। तत्रोत्पादविना यि
शशाली चतुर्थोऽयमभाव इति केचित्।। तत्र ध्वंसप्रागभावाधिकरणे नात्यंताभाव इति प्राचां मतं।। श्याम पो३
घटे रक्तो नास्ति रक्तघटे श्यामो नास्ति प्रागभावध्वंसावगाहते न तु [redacted]त्यंताभावं विरोधात्।। नव्यास्तु।। तत्र
विरोधे मानाभावात्।। ध्वंसादिकालावच्छेदेनात्यंताभावो वर्तत इत्याहुः।। नन्वस्तु अभावानामधिकरणा

N

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

= समानो धर्मः स धर्मः न स्प भानः साधर्म्यं तेषं वैधर्म्यं तेषं इति शु त्सा साधर्म्य वैधर्म्य तेषत्वादो
= गतेन भामनिवारणाय पकवतेसमानोधर्म इत्यादिना २

॥ भाषारि० ॥ त्मक

१ त्मक त्वे लाघवात्॥ अनेनाधिकरणैकवृत्तानापेक्षणा अतिरिक्तवृत्ताभाव वल्लघीयस्त्वात्॥ एवं च आधाराधेयभावोप्युपपद्यते॥ एवं च तत्तत्पदार्थं धरसा
घभावांनोतत्तद्वृद्धिविधेः असङ्ख्यात्वमप्युपपद्यते॥ अन्यथा तत्त [redacted] द्विकरणांनोतत्तद्वृद्धिविधेः असङ्ख्यात्वं न स्यात् ऐतैतेषां न विशेषको विशेषा न २ त
त्मकत्वमपि प्रत्युक्तं॥ इदानीं पदार्थानां साधर्म्य वैधर्म्ये वक्तुं उपक्रमते॥ समानामित्यादिना [redacted]॥ समानो धर्मो येषां ते सधर्माणः॥ तेषां भा
वः साधर्म्यं॥ समानो धर्म इति फलितोर्थः॥ एवं विरुद्धो धर्मो [redacted]॥ येषां ते विधर्माणः तेषां भावः वै[redacted]धर्म्यं विरुद्धो धर्म इति र्म
फलितोर्थः॥ ज्ञेयत्वं ज्ञानविषयता सा च सर्वज्ञे वा वास्ति ईश्वरज्ञानविषयतायाः केवलान्वयित्वात्॥ एवं अभिधेयत्वं प्रमेयत्वादिकं बोध्यं
[redacted] व्यादय इत्यादि द्रव्यगुणकर्मसामान्यविशेषाणां साधर्म्यम् अनेकत्वं समवायित्वं च॥ यद्यपि अनेकत्वं अभावेप्यस्ति तथा
पि अनेकत्वे सति भावत्वं॥ तथा च पदनेकत्वा वर्त्तिपदार्थविभाजकोपाधिमत्वं फलितोर्थः तेन द्वित्वं घटादौ नाव्याप्तिः॥ समवायित्वं
समवायसंबंधेन [redacted] संबंधित्वं॥ न तु समवायवत्वं॥ सामान्यादावभावात्॥ सत्तावंत इति॥ द्रव्यगुणकर्मणां सत्तावत्त्वमित्यर्थः॥ गुणादिरिति॥
यद्यपि गुणक्रियाशून्यत्वं आद्यक्षणे घटादावतिव्याप्तं क्रियावत्वं गगनादावतिव्याप्तं॥ तथापि गुणवद्वृत्तिधर्मवत्वं क्रियावद्वृत्तिपदा
र्थविभाजकोपाधिमत्वं चेत्यर्थः॥ न घटत्वादिकं द्रव्यत्वं गुणवद्वृत्ति कर्मवद्वृत्ति वा किंतु गुणत्वादिकं तथा॥ आकाशत्वादिकं न व्याख्या

प्रा०
॥४॥

आकाशत्वादिकं तु न पदार्थविभाजकोपाधिः सामान्येति सामान्यानधिकरणत्वं सामान्यादीनामित्यर्थः पारिमाण्डल्येति पारिमाण्ड
ल्यम् अणुपरिमाणं कारणत्वं तद्भिन्नानामित्यर्थः अणुपरिमाणं तु न कस्यापि कारणम् तद्धि स्वाश्रयारब्धद्रव्यपरिमाणा
रंभकं भवेत् न चैतत्संभवति परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वात् महदारब्धस्य महत्तरत्ववदणुजन्य
स्य अणुतरत्वप्रसंगात् एवं परममहत्परिमाणमतीन्द्रियं सामान्यं विशेषाश्च बोध्याः इदमपि योगिप्रत्यक्षविषयस्य न
कारणत्वं ज्ञायमानं सामान्यं न प्रत्यासत्तिः ज्ञायमानं लिंगं नानुमितिकरणमित्यभिप्रायेण आत्ममानसप्रत्यक्षे आत्ममहत्त्व
स्य कारणत्वात् परममहत्परिमाणमाकाशादेर्बोध्यम् तस्यापि न कारणत्वमित्यस्याचार्याणामाशयः इत्यन्ये तन्नेत्याहुरिति
कं प्रति अकारणता या एवाचार्यैरुक्तत्वात् ननु कारणत्वं किमत आह अन्यथेति तस्य कारणत्वस्य यत्समवेति॥ य
त्समवेतं कार्यमुत्पद्यते तत्समवायिकारणमित्यर्थः तन्त्वेति समवायिकारणे प्रत्यासन्नं कारणमसमवायिकारणमि
त्यर्थः अत्र यद्यपि तुरीतन्तुसंयोगे पटासमवायिकारणत्वं स्यात् एवं वेगादीनामभिघाताद्यसमवायिकारणत्वं स्या
त् एवं ज्ञानादीनामपीच्छाद्यसमवायिकारणत्वं स्यात् तथापि पटासमवायिकारणलक्षणे तुरीतन्तुसंयोगभिन्न
त्वं देयम् तुरीतन्तुसंयोगस्तु तुरीपटसंयोगं प्रत्यसमवायिभवत्येव कारणं एवं वेगादिकं स्पन्दनाद्यसमवायिकार
णं भवत्येवेति तत्तत्कार्यासमवायिकारणलक्षणे देयम् आत्मविशेषगुणानां तु कुत्राप्यसमवायिकारणत्वं ना
भवत्येव ७१

राम॰ मुक्ता॰

श्री२

५ जातिः। तेन नभिन्नत्वं सामान्यलक्षणे देयमेव। असमवायिकारणे प्रत्यासन्नत्वं द्विविधं कार्य्यैकार्थप्रत्यासत्त्या कारणैकार्थप्र

म२ त्यासत्त्या च आद्यं यथा घटादिकं प्रति कपालद्वयसंयोगादिकमसमवायिकारणम्। कार्य्येण घटेन सह कारणस्य कपालसंयोगस्य द्व्य२

स्य एकस्मिन्कपाले प्रत्यासत्तिरस्ति। द्वितीयं यथा। घटरूपं प्रत्यसमवायिकारणं कपालरूपं तत्र घटरूपं प्रति समवायि

कारणं घटस्तेन सह कपालरूपस्य एकस्मिन्कपाले प्रत्यासत्तिरस्ति। तथा च क्वचित्समवायसंबंधेन क्वचित्समवायि

समवेतत्वसंबंधेनेति फलितो ऽर्थः। एवं च कार्य्यैकार्थ्यकारणैकार्थान्यतरप्रत्यासत्त्या कारणं ज्ञानादिभिन्नं समवा म५

यिकारणमिति सामान्यतः पर्य्यवसन्नं। आभ्यां समवाय्यसमवायिकारणाभ्यां भिन्नं तृतीयं निमित्तकारणमि

त्यर्थः। इदानीमन्यथासिद्धत्वमेव कियतां तदाह। येनेत्यादिना। यत्कार्य्यं प्रति कारणस्य पूर्ववृत्तित्वं येन रूपेण

गृह्यते तत्कार्य्यं प्रति तद्रूपमन्यथासिद्धमित्यर्थः। यथा घटं प्रति दण्डत्वं द्वितीयमन्यथासिद्धमाह। कारणमिति

यस्य स्वातंत्र्येणान्वयव्यतिरेकौ न स्तः किंतु कारणमादायैवान्वयव्यतिरेकौ गृह्येते तदन्यथासिद्धम्। यथा दण्ड

रूपं। तृतीयमन्यथासिद्धमाह। अन्यं प्रतीति। अन्यं प्रति पूर्ववृत्तित्वं गृहीत्वैव यस्य यं प्रति पूर्ववृत्तित्वं गृह्यते तेन

रूपेण तत्कार्य्यं प्रति अन्यथासिद्धं यथा घटं प्रति आकाशस्य। आकाशस्य हि घटादिकं प्रति कारणत्वमाकाशत्वेन स्यात्।

आकाशत्वं तु शब्दसमवायिकारणत्वं। अतः शब्दं प्रति जनकत्वं गृहीत्वैव घटादिकं प्रति जनकत्वं ग्राह्यम्। अतस्तदन्यथासि एमः ५

चतुर्निवेशांतरे ऽन्यथाक्लृप्तेनिरूपितेनलघ्वेऽत्रावश्यक्लृप्तेतिसंतत्वतस्नसत्त्वभाहत्यातएवेति=७

द्धम्। शब्दाश्रयत्वेन तस्य कारणत्वे कान्यथासिद्धिरिति चेत् पञ्चमो आकाशस्य शब्दं प्रति जनकत्वे किमवच्छेदकमिति चेत् आके

वलत्वादिकं विशेषपदार्थो वेति। चतुर्थमन्यथासिद्धमाह जनकं प्रतीति। यत्कार्य्यजनकं प्रति पूर्ववर्त्तित्वं गृहीत्वैव यस्य यः

त्कार्य्यं प्रति पूर्ववर्त्तित्वं गृह्यते तस्य तत्कार्य्यं प्रति अन्यथासिद्धत्वम्। यथा कुलालपितुः घटं प्रति तस्य हि कुलालपितृ

त्वेन घटं प्रति जनकत्वे ऽन्यथासिद्धम्। कुलालत्वेन रूपेण जनकत्वे ऽतिव्याप्तिः। कुलालमात्रस्य घटं प्रति जनकत्वात्। प

ञ्चममन्यथासिद्धमाह अतिरिक्तमिति अवश्यक्लृप्तनियतपूर्ववर्त्तिन एव कार्य्यसंभवे तद्भिन्नमन्यथासिद्धमित्यर्थः

अतएव प्रत्यक्षे महत्त्वं कारणं अनेकद्रव्यत्वमन्यथासिद्धम्। तत्र हि महत्त्वं अवश्यक्लृप्तं तेन अनेकद्रव्यत्वमन्यथासि

द्धम्। न च वैपरीत्ये किं विनिगमकमिति वाच्यम्। महत्त्वजातेः कारणतावच्छेदकत्वे लाघवात्। रासभादिरितिय

द्यपि यद्घटं प्रति रासभस्य नियतपूर्ववर्त्तित्वमस्ति तथापि तत्र घटजातीयं प्रति सिद्धकारणभावैर्दण्डा

२४ दिभिरेव तद्घटेऽपि संभवे एतस्य अन्यथासिद्ध[illegible]त्वमिति भावः। एतेष्विति एतेषु पञ्चसु अन्यथासिद्धेषु मध्ये पञ्च

मोऽन्यथासिद्ध आवश्यकः तेनैव परेषां चरितार्थत्वात्। तथा हि दण्डादिभिरेव दण्डरूपादीनां नियतपूर्ववृत्तिभि

रेव कार्य्यसंभवे दण्डत्वादिकमन्यथासिद्धम्। न च वैपरीत्ये किं विनिगमकमिति वाच्यम्। दण्डत्वस्य कारण

ते द[illegible]घटितपरंपरायाः संबंधत्वे गौरवात्। एवमन्येषामप्यनेनैव चरितार्थत्वं संभवति। समवायीति। स्पर्श

णु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री
एम.मु.का
६

गुणकर्मेति असमवायिकारणत्वं गुणकर्मभिन्नानां वैधर्म्यं न तु गुणकर्मणोः साधर्म्यं इत्यत्र तात्पर्यं। अथवा समवायि
कारणत्वनिरूपणाभिन्नजातिमत्त्वं तदर्थः तेन ज्ञानादीनामसमवायिकारणत्वविरहेऽपि न क्षतिः अन्यत्रेति। निःस्पर्शा इति
परमाण्वाकाशादीनी विहायान्यत्र त्वं साधर्म्यमित्यर्थः अत्रिनत्वं समवायादिसंबंधेन वर्तिमत्त्वम् विशेषणतया नित्या
नामपि कालादौ वर्तनेः इत्यनी द्रव्यत्वे च विशिष्य साधर्म्यं वक्तुमारभते। क्षित्यादीनामिति। क्षितिर्जलमिति। पृथिव्य
प्तेजोवायुमनसां परत्वापरत्वं मूर्तत्वम् क्रियावत्त्वं वेगवत्त्वं च साधर्म्यं न च परत्वापरत्वे नोसन्ने त
त्राव्याप्तिरिति वाच्यम् परत्वादिसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् मूर्तत्वं अपकृ
ष्टपरिमाणवत्त्वम् तच्चैतेषामेव गगनादिपरिमाणस्य कुतोऽप्यपकृष्टत्वाभावात् एवं च कर्मवत्त्वं कर्मस
मानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वम् वेगवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं च बोध्यम् कालेति कालखात्मदिशां
सर्वगतत्वं सर्वमूर्तसंयोगित्वं परममहत्त्वं परममहत्त्वं जातिविशेषः अपकर्षानाश्रयपरिमाणत्वं वा
क्षित्यादीति क्षित्यप्तेजोवाय्वाकाशानां भूतत्वम् तच्च बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वं अत्रात्मत्वं लौकि
कप्रत्यक्षस्वरूपयोग्यत्वं बोध्यम् तेन ज्ञानो घटादिप्रत्यक्षे ज्ञानस्याप्युपनीतभानविषयत्वात् इति भा
मलिनातिर्व्याप्तिः न वा प्रत्यक्षादिविषयद्व्यादिमनि परमाण्वादावव्याप्तिः न सापि योग्यत्वान्महत्त्वस्य सत्त्वात्

श्री
एमः
६

मु

कारणानेण सन्निधानाद्विनप्रत्यक्षायत्तामारत्ति विशेषगुणवत्त्वं भूतत्वं। चत्वारीति। पृथिव्यप्तेजोवाय्वाकाशा
नां स्पर्शवत्त्वम्। द्रव्यारंभ इति। पृथिव्यप्तेजोवायूनां चतुर्णां द्रव्यारंभकत्वं। न च द्रव्यारंभकेषु द्व्यणुकादावव्याप्तिरिति वाच्यं। द्र
व्यसमवायिकारणवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्। आकाशशरीरिणामिति। आकाशात्मनां अव्याप्यवृत्ति श
४ का क्षणिकविशेष[redacted]गुणवत्त्वं। अंशस्य विशेषगुणः शब्दः स च अव्याप्यवृत्ति[redacted]। यदि किंचिद्ध्वत्वं
न शब्दः उत्पद्यते तदाग्न्यावच्छेदेन तदभावस्यापि सत्त्वात्। क्षणिकत्वं च तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वं।
योग्यविभुविशेषगुणानां स्वोत्तरवर्तिगुणनाश्यत्वात्। प्रथमशब्दस्य द्वितीयशब्देन नाशः। एवं ज्ञानादीनामपि।
ज्ञानादिकं हि स्वात्मनि विभौ शरीराद्यवच्छेदेनोत्पद्यते घटाद्यवच्छेदेन तदभावोऽप्यस्त्येव एवं ज्ञानादिकमपि क्षणद्व
यावस्थायी। इत्थं च अव्याप्यवृत्तिविशेषगुणवत्त्वं क्षणिकविशेषगुणवत्त्वं चार्थः। पृथिव्यादौ रूपादिविशेषगुणा
स्तीत्यतो व्याप्यवृत्तीत्युक्तं। तच्चैवाव्याप्यवृत्तिसंयोगादिरस्त्यत उक्तं विशेष इति। न च रूपादीनामपि तत्ती
यक्षणे नाशसंभवात् क्षणिकविशेषगुणवत्त्वं क्षित्यादावतिव्याप्तमिति वाच्यं। चतुर्थक्षणवृत्तिजन्यावृत्तिजातिमद्वि
शेषगुणत्वस्य विवक्षितत्वात्। अपेक्षाबुद्धिः क्षणत्रयपर्यन्तस्थिति क्षणचतुष्टयं न किमपि ज्ञानादिकं तिष्ठति। रूपत्वादिकं
तु क्षणचतुष्टयस्थायिन्यपि रूपादौ वर्तत इति तत्र हुतासः। ईश्वरीयज्ञानस्य क्षणचतुष्टयस्थायित्वात्। ज्ञानत्वस्य तद्वृ
त्तित्वात् जन्येत्युक्तं। यथाकाशात्मनोः साधर्म्यं तथा जन्येति न देयं। द्वेषत्वादिकमादाय लक्ष्यसंभवात्। परम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रामं॰मुक्ता॰ ॥८॥

महत्वस्यनादृश्यत्वाद्गुणत्वात् चतुर्थक्षणेद्वित्वादीनामपिनाशाभ्युपगमात्द्वित्वादीनामपितथात्वात् तद्वारायापिविशेषेति॥त्रिक्षण
वृत्तित्वंबावाच्यं॥इच्छादिकेमाहापकस्मात्मनिलक्षणसमन्वयात्॥रूपेति॥पृथिव्यप्तेजसांरूपवत्त्वंद्रवत्वंवत्वंप्रत्यक्षविषयत्वंचे
च३ त्यर्थः॥नचैवंजतुरादीनामजनकपात्रस्यवंहेरूष्मणश्चरूपवत्वेद्विमानमितिवाच्यं॥तत्रापितेजस्त्वेनरूपानुमानात्॥एवं
वायूवानीतपृथिवीजलतेजोभागानामपिपृथिवीत्वादिनारूपानुमानेबोध्यं॥नचघटादौदृतसुवर्णभिन्नेतेजसिच
द्रवत्वमव्याप्तमितिवाच्यं॥द्रवत्ववद्वृत्तिद्रव्यत्वव्याप्यजातिमत्वस्यविवक्षितत्वात्॥घृतजतुप्रभृतिषुपृथिवीषु
द्रुतसुवर्णादौतेजसिचद्रवत्वसत्वात्तत्रपृथिवीत्वादिसत्वात्तद्दायसर्वत्रलक्षणसमन्वयात्॥नचप्रत्यक्षविषय
त्वंपरमाण्वादावव्याप्तमतिव्याप्तंचरूपादाविति वाच्यं॥लौकिकचाक्षुषप्रत्यक्षविषयेशेतिद्रव्यत्वव्याप्यजातिमत्व प७
स्यविवक्षितत्वात्॥आत्मन्यतिव्याप्तिवारणायचाक्षुषेति॥गुरुणीति॥गुरुत्ववत्वंरसवत्वंपृथिवीजलयोरित्यर्थः च८
घ्राणेंद्रियादीनां नचैवायवानीतपृथिव्या[redacted]दिभागानांचरसादिमत्वेद्विमानमितिवाच्यं॥तत्रापिपृथिवीत्वादिनातदनुमानात् ९
द्वयोरिति॥पृथिवीतेजसोरित्यर्थः॥नचैवंनैमित्तिकद्रवत्वंघटादौवरूपादौचाव्याप्तमितिवाच्यं॥नैमित्तिकद्रव
त्वसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्वस्यविवक्षितत्वात्॥आत्मनइति॥पृथिव्यप्तेजोवायूवाकाशानांवि
शेषगुणवत्वमित्यर्थः॥पुद्गलमिति॥क्षेपत्वादिकंविहायेतिबोध्यं॥ततुनकस्यापिवैधर्म्यंकेवलान्वयित्वात्॥इ
यंसाधर्म्यवैधर्म्यंनिरूप्य[redacted]संप्रतिप्रत्येकंपृथिव्यादिकंनिरूपयतितत्रक्षितिरित्यादिनागंधहेतुरिति॥ध॥ रामंमुक्ता॰ ॥८॥

गंधसमवायिकारण[redacted]मित्यर्थः॥यद्यपिगंधवत्वमात्रंलक्षणमुचितंतथापिपृथिवीत्वजातौप्रमाणोपन्यासाय
कारणत्वमुपन्यस्तं॥तथाहिपृथिवीत्वंगंधसमवायिकारणतावच्छेदकतयासिध्यति॥अन्यथागंधत्वावच्छिन्न
स्याकस्मिकत्वापत्तेः॥नचपाषाणादौगंधाभावात्गंधवत्वमव्याप्तमितिवाच्यं॥तत्रापिगंधसत्वात्॥अनुपलब्धि
मन्यथा४ स्तुअनुत्कटत्वेनाप्युपपद्यते॥कथं तद्भस्मनिगंधउपपद्यते॥भस्मनोहिपाषाणध्वंसजन्यत्वात्पाषाणोपादानोपादेयत्वंसि न्य४ पो
ध्यति॥यद्द्रव्यंयद्द्रव्यध्वंसजन्यंतत्तदुपादानोपादेयमितिव्याप्तेः॥दृष्टंचैतत्खंडपटेमहापटध्वंसजन्ये॥द्रव्यंचपाषाणपर
माणोःपृथिवीत्वात्तज्जन्यस्यपाषाणस्यापिपृथिवीत्वं॥तथाचतस्यापि[redacted]त्वेबाधकाभावः॥नानारूपेति॥शुक्लनी गंध ६
आदिभेदेननानाजातीयंरूपंपृथिव्यामेववर्ततेनतुजलादौतत्रशुक्लस्यैवसत्वात्॥पृथिव्यांतुएकस्मिन्धर्मिणिपाकव
शेननानारूपसंभवात्॥नचयत्रनानारूपंनोस्तिनतत्राव्याप्तिरितिवाच्यं॥रूपद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्व
स्यविवक्षितत्वात्॥रूपनानात्ववद्वृत्तिद्रव्यत्वव्याप्यजातिमत्वस्यवाविवक्षितत्वात्॥वैशेषिकनयेपृथिवीपरमा
णोरूपनाशस्यरूपांतरस्यचसत्वात्॥न्यायनयेघटादावपितथात्वात्लक्षणसमन्वयः॥षड्विधइति॥मधुरकटु
कषायादिभेदेनषड्विधरसःपृथिव्यामेव॥जलेतुमधुरएवरसः॥अत्रापिपूर्ववत्रसद्वयवद्वृत्तिद्रव्यत्वव्याप्य
जातिमत्वंलक्षणंबोध्यमवसेयः॥गंधस्त्विति॥द्विविधइतिववस्तुस्थितिमात्रंनतुद्विविधगंधवत्वमपिलक्षणं
द्विविधत्वस्याव्यर्थत्वात्॥द्वैविध्यंचसौरभासौरभभेदेनबोध्यंस्पर्शादेति॥तस्याःपृथिव्याः॥अनुष्णाशीतस्पर्श

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री
रामभु०ली
॥९॥

त्वेवापावधिवर्तत इति मतउक्तं पाकज इति ॥ इदं च पृथिव्यां स्पर्शोऽनुष्णाशीत इत्यापनार्थं तदुक्तं ॥ पाकजस्पर्शवत्त्वमात्रेण
दोषे ॥ अधिकस्य वैय्य [redacted] र्थात् ॥ यद्यपि पाकजस्पर्शः पदार्थो नास्ति तथापि पाकजस्पर्शवद्वृत्ति द्रव्यत्वव्याप्यजातिमत्त्वं ॥
०प्रथ्यो बोध्यः ॥ निसैलि [redacted] ॥ सा पृथिवी द्विविधा नित्या अनित्या चेत्यर्थः ॥ अणुलक्षणा परमाणुरूपा पृथिवी नित्या तदन्या प
रमाणुभिन्ना द्व्यणुकादिः सर्वाप्यनित्या इत्यर्थः ॥ सैव अनित्या पृथिव्येव अवयवतीत्यर्थः ॥ नन्ववयविनि किं मानं ॥ तत्र प
परमाणुपुंज एवोपपत्तेः न च परमाणूनामतीन्द्रियत्वात् घटादेः प्रत्यक्षत्वं न स्यादिति वाच्यं ॥ एकस्य परमाणोरप्रत्यक्षत्वेपि
तत्समूहस्य प्रत्यक्षत्वात् ॥ यथैकस्य केशस्याप्रत्यक्षत्वेपि तत्समूहस्य प्रत्यक्षता ॥ न चैकस्थूलो घट इति बुद्धेरनुपपत्तेरिति वा
च्यं ॥ एको महान् धान्यराशिरितिवदुपपत्तेः मैवं ॥ परमाणोरतीन्द्रियत्वेन तत्समूहस्यापि प्रत्यक्षायोगात् ॥ दूरस्थके
शास्तु नातीन्द्रियाः ॥ तत्संनिधाने तस्यैव प्रत्यक्षत्वात् ॥ न च तदानीं दूरस्थपरमाणु [redacted] पुंजस्यात्यन्तत्वात् न प्रत्यक्षत्वे ते७
रोधः इति वाच्यं ॥ तत्र तद्वत्त्वेपाति द्रव्यग्रहणाव पर्यवस्थूलत्वह [redacted] ॥ नोत्पत्तेरभ्युपगहनात् ॥ न्यायदर्शनव
णुकेणवन्ये त्र्यसरेणोरसत्त्विरिति वाच्यं ॥ यतो न वयं द्रव्यत्वं महद्रूपत्वं वा स्वाश्रयस्वभावो नानुचयमहतो ॥ परं तु महत्त्वो तरु वा५
पादिकारणसमुदायवृत्त्या द्रूपत्वे तदभावे चाद्रव्यत्वं ॥ तथा च त्र्यसरेणोर्महत्त्वात् प्रत्यक्षत्वं न तु द्व्यणुकादेस्तदभावात् ॥
न हि त्वन्मतेपी द्रूपं भवति परमाणो महत्त्वाभावो तत् ॥ इदं च अवयविसिद्धौ तत्पुंजसादृश्यविनाशयोः प्रत्यक्षसिद्ध श्री
त्वात् [redacted] नित्यतेषां चावयवावयवधारायाः अनेनत्वे मेरुसर्षपयोरपि साम्यप्रसंगः ॥ अतेषु चिते विश्रामो वाच्यः ॥ रामभुत्ता०
पत्रविश्रामस्तस्यानित्यत्वे अप्रसमवेतभावकार्यस्यातिप्रसंगात् तस्य नित्यत्वं ॥ महत्परिमाणतारतम्यस्य गगनादौ वि ॥९॥

तारतम्य

७ [redacted] ३

श्रांतत्वमिव अणुपरिमाणस्यापि क्वचिद्विश्रा [redacted] त्वं अस्ति इति तस्य परिमाणत्वसिद्धिः ॥ न च त्र्यसरेणावेव विश्रा व१
मोस्त्विति वाच्यं ॥ त्र्यसरेणुः सावयवः चाक्षुषद्रव्यत्वात् घटवदित्यनुमानेन तदवयवसिद्धौ त्र्यसरेणोरवयवः सावय
वः महदवयवत्वात् कपालवदित्यनुमानेन तदवयवसिद्धेरिति ॥ नन्वेवमप्रयोजकमप्रत्यक्षमहत्त्वं अनेकद्रव्यत्वस्य प्रयो प्रति3
जकत्वान्नैवं क्रमेणात्र द्रव्यधारापि सिद्धेरिति वाच्यं ॥ अनवस्थाभयेनात्रहीनसिद्धेरिति ॥ सा चत्रिधेति सा कार्यरूपापृ
थिवी त्रिधा शरीरेन्द्रियविषयभेदात् तत्रादेमुदाहरति ॥ योनिजादीति ॥ योनिजमयोनिजमित्यर्थः ॥ योनिजमपि
जरायुजमंडजं च ॥ जरायुजं मानुषादीनां ॥ अंडजं सर्पादीनां ॥ अयोनिस्वेदजोद्भिज्जादिकं ॥ स्वेदजाः कृमिदं
शाद्याः उद्भिदः तरुगुल्माद्याः नारकीणामपि शरीरमयोनिजमेव ॥ न च मानुषशरीराणां पार्थिवत्वे किंमा
नमिति वाच्यं गंधादिमत्त्वस्यैव मानत्वात् ॥ न च क्लेदोष्मादेरुपलंभाज्जलत्वादिकमपि स्यादिति वा
च्यं ॥ तथा सति जलत्वपृथिवीत्वादिना संकरप्रसंगात् ॥ न च तर्हि जलत्वादिकमेवास्तु न तु पार्थिवत्व
मिति वाच्यं ॥ क्लेदादीनां विनाशेपि शरीरत्वे प्रत्यभिज्ञानो गंधाद्युपलब्धेश्च पृथिवीत्वसिद्धेः ॥ न४
एतेन पार्थिवादिशरीरे जलादीनां निमित्तमात्रं बोध्यं ॥ शरीरत्वं तु न जातिः पृथिवीत्वादिना सांकर्यात् ॥ किंतु ॥
चेष्टाश्रयत्वं ॥ वृक्षादीनामपि चेष्टाश्रयत्वान्नाव्याप्तिः ॥ नैवं वृक्षादीनां शरीरत्वे किं मानं ॥ आध्यात्मिकवायुसंबं
धस्यैव प्रमाणत्वात् तत्रैव किं मानमिति चेत् ॥ भग्नक्षतसंरोहणादिना तदुन्नयनात् ॥ यद्दिहस्तादौ शरीरव्यवहारो न मे

= शरीरत्वावच्छिन्ने पंचभूतानां कारणत्वे पांचभौतिकत्वव्यवहारे सत्यपि
= पांचभौतिकत्वव्यवहारः न पंचभूतोपादानत्वनिबंधनः किं तु ... त्वनि
= बंधनः तथा च पार्थिवजलीयादिशरीरेषु पृथिव्याद्येकैकस्य [redacted]
= आश्रित ... पार्थिवत्वादिव्यवहारः ... शरीरे ... ॥२ = भग्नक्षतपार्थिवभागविशिष्टावयवोः संयोगेन ... नयनात्

१ = समवायसंबंधेनद्रव्यारंभकत्वेसतिद्रव्यत्वं

मनुष्यशरीरेचेष्टाश्रयभोगायतनत्वं=२ तदाश्रैत्याय पवित्वेन विशेषणीयं ।। नच वृक्षशरीरे चेष्टानभावात् तत्राव्याप्तिरिति वाच्यं ।। तादृशे प्रमाणाभावात् ।। शरी

रत्वावच्छेदकत्वावच्छिन्नचेष्टावद्वृत्तिपृथिवीवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं शरीरत्वव्याप्यमात्रवृत्तिचेष्टावद्वृत्तिजातिमत्त्वं वा तत् ।। मानुषत्व

चैत्रत्वादिजातिमादाय लक्षणसमन्वयः ।। न च नृसिंहशरीरे कथं लक्षणसमन्वयः तत्र नृसिंहत्वस्य एकव्यक्तित

याऽजातित्वाभावात् ।। अलौकिकतेजसशरीरस्वीकारात् तद्देवत्वस्यापि जातित्वाभावादिति वाच्यं ।। रूपभेदेन नृ

सिंहशरीरस्य नानात्वेन नृसिंहत्वजात्या लक्षणसमन्वयात् ।। इन्द्रियमिति ।। घ्राणेन्द्रियं पार्थिवमित्यर्थः

पार्थिवत्वे किं प्रमाणमिति चेत् द्रव्यघ्राणेन्द्रियं पार्थिवं रूपादिषु पंचसु मध्ये गंधस्यैव व्यंजकत्वात् ।। कुंकुमगंधाभि

व्यंजकघृतादिवत् ।। न चेद्दृष्टान्ते स्वीयपररूपाभिव्यंजकत्वाद् दृष्टान्तासिद्धिरिति वाच्यं ।। परकीयरूपाभिव्य

जकत्वस्य तदर्थत्वात् ।। न च नवशरावगंधाभिव्यंजकजले नानैकान्तिकमिति वाच्यं ।। तस्य सक्तुरसाभिव्यं

जकत्वात् ।। यद्वा परकीयेति न देयं वायूपनीतसुरभिभागस्य दृष्टान्तत्वसंभवात् ।। न च घ्राणेन्द्रियसंनिकर्ष

स्यगंधमात्रव्यंजकत्वात् तत्र व्यभिचार इति वाच्यं ।। द्रव्यत्वे सतीति विशेषणीयमिति ।। उपभोगसाधनं तृ ।।

विषयः ।। सर्वमेव कार्यजातमदृष्टाधीनं यत्कार्यं यददृष्टाधीनं तत्तदुपभोगं साक्षात्परंपरया वा जनयत्ये

व ।। नहि बीजप्रयोजनाभ्यां विनाकस्यचिदुत्पत्तिरस्ति ।। तेन द्व्यणुकादिब्रह्माण्डान्तं सर्वमेव विषयो भवति ।

शरीरेन्द्रिययोर्विषयत्वेपि प्रकारान्तरोपन्यासः शिष्यबुद्धिवैशद्यार्थः ।। जलं निरूपयति वर्णः शुक्ल इति ।। स्नेहसमवायि

कारणतावच्छेदकतया जलत्वजातिसिद्धिः ।। यद्यपि स्नेहत्वं कार्यतावच्छेदकं [struck] तथापि जन्यस्नेहत्वे नित्यानित्य

तथा बोध्यं ।। अथ परमाणौ जलत्वं न स्यात् ।। तत्र जन्यस्नेहाभावात् ।। नस्य नित्यस्य स्वरूपयोग्यत्वे फलावश्यंभा इति तया न

वनियमात् इति चेन्न ।। जन्यस्नेहजनकतावच्छेदकतया जन्यजलत्वजातेः सिद्धौ तद्वच्छिन्नजनजनकता

३ जलस्पर्श द्व वच्छेदकतया जलत्वजातिसिद्धेः ।। शुक्लरूपवत्त्वमेव वैधर्म्यमपि तु मुक्तं शुक्ल इति न तु शुक्लरूपवत्त्वं लक्षणं ।। द्रव्य

वान्नैमित्तिकद्रवत्ववद्वृत्तिरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं भास्वरशुक्लेतरासमानाधिकरणरूप

वद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं वा तदर्थः ।। रसस्पर्शाविति ।। जलस्य मधुर एव रसः शीत एव स्पर्शः ।।

तिक्तवदवृत्तिमधुरवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं च तदर्थः ।। ननु शुक्लरूपमेवेति कुतः कालिंदीज

ले नीलिमोपलब्धेरिति चेन्न ।। नीलजनकतावच्छेदिकायाः पृथिवीत्वजातेरभावाज्जले नीलभ

रूपासंभवात् ।। कालिंदीजले नीलरूपप्रतीतिस्तु आश्रयोपाधिकी अन्तरीक्षविपतितविक्षेपे धवलि

मोपलब्धेः ।। अथ जले माधुर्ये किं मानं नहि कोपि रसस्तत्र प्रत्यक्षेण[illegible] नुभूयते । यनारिकेलजल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राम मुक्ता० ॥१०॥

=अत्र पवरसात्कुलन्यपृथिवीरसस्याग्निसंयोगमात्रलब्धस्यानिर्देनहनुरोधमात्रेणजलसंयोगस्यापृथिवीरसोत्पादकत्वेस्वीकारे अतिप्रसक्तापूर्वकारणभावस्वीकारेहरीतक्यांमधुररसस्य स्वीकारेगौरवादिभावः=३
३=ननु अम्लजलेमधुररसः तथापिजंबीरजलेसम्भवत्यम्लरसस्याग्नीकारेबाधकाभावस्तत्राह=

दौमाधुर्यमुपलभ्यतनिवाच्यंतस्याऔपाधिकत्वात्॥अन्यथाजंबीरकरवीरादौआम्लरसाद्युप
लब्धेराम्लादिमत्वमपिस्यादिति चेन्नहरितक्यादिभक्षणस्यजलरसव्यंजकत्वात्॥नचहरीतक्यामेव
जलोष्मसंयोगाद्रसांतरोत्पत्तिरितिवाच्यं॥कल्पनागौरवात्॥पृथिवीत्वस्यआम्लादिजनकतावदज
लिला ४ लेनाम्लादिकंजंबीररसेसरादौतुआश्रयोपाधिकीतयाप्रतीतिः॥एवंजन्यशीतस्पर्शजनकताव
च्छेदकंजलत्वंजन्यजलत्वंवातथाबोध्यं॥घृष्टचंदनादौतुशैत्योपलब्धिश्चचंदनांतर्वर्त्तिशीत
तरसलिलस्य॥तेजःसंयोगाज्जलेऔष्ण्यप्रतीतिराश्रयौपाधिकीस्फुटैवतत्रपाकासंभवा
त्॥स्नेहेस्तत्रेति॥घृतादावपितदंतरवर्त्तिजलस्यैवस्नेहः॥जलस्यैवस्नेहस्सर्वापिकारण
त्वात्॥तेनजलेएवस्नेहइतिमंतव्यं॥द्रवत्वमिति॥सांसिद्धिकद्रवत्वत्वंजातिविशे राम
षप्रत्यक्षसिद्धः॥तदवच्छिन्नजनकतावच्छेदकंतदेवेतिभावः॥तैलादावपितदंतर मुं० की
॥१०॥

[redacted]

नित्यतादि १

तिं [redacted] जलस्यैवद्रवत्वं स्नेहप्रकर्षेणसंहननानुकूल्यमितिवक्ष्यतेश्वेयमुद्रदिति पृथिव्यामेवसर्थः तथाहिजलं हि द्विविधं नित्यम
नित्यंच परमाणुरूपंनित्यं द्व्यणुकादिसर्वमनित्यमवयवसमवेतंच अनित्यमपित्रिविधं शरीरेंद्रियविषयभेदात् पृथिवीतो
यविशेषस्तमाह किंत्विति ~~अयोनिजमेवस्यार्थः शरीरं स्यादवयवसमवेतंच अनित्यमपित्रिविधं शरीरेंद्रियविषय~~
जलीयं शरीर ~~पृथिवीतोयविशेषस्तमाह किंत्विति~~ अयोनिजमेवसर्थः [redacted] विकरणालोकप्रसिद्धं इंद्रियंरसनंजलीय तच्च
यमिसर्थः तथाहिरसनंजलीयंगंधा[illegible]घव्यंजकत्वेसतिरसव्यंजकत्वात् सक्तुरसाभिव्यंजकोदकवत् रसनेंद्रियमन्तिक
षैव्यभिचारवारणायइद्रमत्तंरूपं विषयंदर्शयति सिंधुहिमादिरिति सिंधुः समुद्रः हिमंतुषारं आदिपदात्शिलासारकर
कादिः सर्वोग्राह्यः नचहिमकरकयोः काठिन्यात्पार्थिवत्वमितिवाच्यं ऊष्मणाविलीनयोस्तयोर्जलत्वस्यप्रत्यक्षसिद्धत्वा
त् यद्द्रव्यंयद्द्रव्यध्वंसजन्यमितिव्याप्त्याजलोपादानोपादेयत्वसिद्धेः अदृष्टविशेषेणद्रवत्वप्रतिरोधात् करकायांकाठिन्यप्र
त्ययस्यभ्रांतत्वात् तेजोनिरूपयति॥उष्णस्पर्शस्स्यादिति उष्णत्वंस्पर्शनिष्ठाजातिविशेषः प्रसक्तसिद्धः उष्णत्वंजन्योष्णस्पर्शसमवा च
पि कारणतावच्छेदकंतेजस्त्वंजातिविशेषः परमाणुवृत्तितेजस्त्वजलस्यैवानुसंधेयं नचोष्णस्पर्शवत्त्वंचंद्रकिरणादावव्याप्तमिति
वाच्यं तत्राप्युष्णस्पर्शसत्त्वात् किंतुतदंतःपातिजलस्पर्शेनाभिभवात्तस्याग्रहः एवंरत्नकिरणादौपार्थिवस्पर्शेनाभिभवाद्ग्रहः

तस्य२ त्वं२ रु१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चक्षुषस्तैजसत्वे किंमानमिति चे[illegible] उच्यते

मु०ली० दोषानुमृतत्वाच्च तस्य ग्रहः रूपमित्यादि वैभात्रे म[illegible]स्कतंकिरणादौ न्वयापार्थिवरूपेणाभिभवात्तमुक्तरूपाग्रहः तद्रूपाग्रहेपि
णापि चाक्षुषत्वं न स्यादिति चेन्न अन्यदीयरूपेणैव धर्मिग्राहकसंभवात् शंखस्येवपि तथैतिन्ना वह्नेः शुक्लरूपेणाभिभवात् किं
११ तु तदीयं शुक्लत्वमभिभूतमित्यन्ये नैमित्तिकेति नैमित्तिकद्रवत्वं तदुत्तरघृतादिरूपं तेजःमितत्त्वात् नचैनैमित्तिकद्रव
त्ववत्वेन लक्षणे घृतादावव्याप्ते ईतादावतिव्याप्तेरिति वाच्यं एषिव्यन्यनैमित्तिकद्रवत्ववद्वृत्तिजातिमत्त्वस्य विवक्षितत्वा
नित्यत्वादि च त् पूर्ववदिति जलस्येवेत्यर्थः तथाहि तद्द्विविधं नित्यमनित्यं च नित्यं परमाणुरूपं तदन्यदनित्यमवयवि च तच्च त्रेधा शरी
रेन्द्रियविषयभेदात् शरीरमयोनिजमेव तच्च सूर्यलोकादौ प्रसिद्धं तत्रयो विशेषस्तमाह इन्द्रियमिति इन्द्रियं नयनं मनु[illegible]
[illegible] वह्नेस्तैजसं परकीयस्पर्शाद्यव्यंजकत्वे सति परकीयरूपव्यंजकत्वात् प्रदीपवत् प्रदीपस्य स्वीयस्पर्शव्यंजक
त्वात् स्वयमं परकीयेति घटादेः स्वीयरूपव्यंजकत्वात्तत्र व्यभिचारवारणाय द्वितीयं परकीयेति अथवा प्रभाया दृष्टान्तत्वसंभ
वात् द्वयं परकीयेति न देयं चक्षुः सन्निकर्षव्यभिचारवारणाय द्रव्यत्वे देयं विषयं दर्शयति वह्नीति ननु सुवर्णं स्यात्तैजसत्वे
किंमानमिति चेन्न [illegible] सुवर्णं तैजसं असति प्रतिबंधके ऽत्यन्तानलसंयोगेप्यनुच्छिद्यमा
नद्रवत्वाधिकरणत्वात् यन्नैवं तन्नैवं यथा पृथिवीति न चाप्रयोजकं पृथिवीद्रवत्वस्य जलद्रवत्वस्य चाग्निसंयोगनाश्यत्वात् न पृ० ११

(द्वितीयं परकीयपदं तु देयमेव प्रार्थितव्यस[illegible] व्यभिचारवारणायेति भावः २ वि१

(तस्य व्यभिचारनिरूपकाधिकरणास्य सत्त्वेन व

थ्वीति म[illegible]गुरुत्वाश्रयपार्थिवस्यापि तद्दानीं द्रुतत्वात्तेन व्यभिचार इति चेन्न जलमध्यस्थमषीभोस्व तस्मादुक्तत्वात् अपरे तु पी
तिमगुरुत्वाश्रयस्यात्यंताग्निसंयोगेपि पूर्वरूपाय रावृत्तिदर्शनात् तत्प्रतिबंधकं विजातीयं द्रवद्रव्यं कल्प्यते तथाहि अग्निसंयो द्रवत्वं २
गेपि तिमगुरुत्वाश्रयः विजातीयरूपप्रतिबंधकद्रवद्रव्यसंयुक्तः अत्यंताग्निसंयोगेपि पूर्वरूपविजातीयरूपानधिकरणत्वात् ज
लमध्यस्थपीतपटवत् तस्य च पृथिवीजलभिन्नत्वे नैमित्तिकद्रवत्वनियमात् वायुं निरूपयति अपाकजेति अनुष्णाशीतस्पर्शस्य पृ
थिव्यामपि सत्त्वादुक्तमपाकजेति अपाकजस्पर्शस्य जलादावपि सत्त्वादुक्तमनुष्णाशीतेति एतेन वायवीयो विजातीयस्पर्शो
दर्शितः तज्ज्ञानकं तावच्छेदकं वायुत्वमिति भावः एषवायुः स्पर्शादिलिंगकः वायुर्हि स्पर्शशब्दधृतिकंपैरनुमीयते विजातीयस्पर्शेन प
विलक्षणशब्देन तृणादीनां धृत्या शाखादीनां कंपेन च वायोरनुमानं यथा च वायुर्न अत्यक्षस्तथाग्रे वक्ष्यते पूर्ववन्नित्यताद्युक्तं वायु
र्द्विविधः नित्योऽनित्यश्च परमाणुरूपो नित्यस्तदन्योऽनित्यः समवेतश्च सोपि त्रिविधः शरीरेन्द्रियविषयभेदात् शरीरमयोनिजं
पिशाचादीनां परं तु जलीयतैजसवायवीयशरीराणां पार्थिवभागोपष्टंभा[illegible]दुपभोगक्षमत्वं जलादीनां प्राधान्याज्जलीयत्वा
दिकमिति अत्रयो विशेषस्तमाह देहव्यापीति शरीरव्यापकं स्पर्शग्राहकं इन्द्रियं त्वक् तच्च वायवीयं रूपादिषु पंचसु मध्ये स्पर्श
स्यैव व्यंजकत्वात् अंगसंगिसलिलशैत्यव्यंजकव्यजनपवनवत् अत्रापि सन्निकर्षव्यभिचारवारणाय द्रव्यत्वं विशेषणं विषय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१२ निरूपयति घ्राणादिस्तु महावायुपर्यन्तो विषयो मतः यद्यप्यनित्यो वायुश्चतुर्विधस्तस्य चतुर्थी विधा घ्राणादिरित्युक्तमाकरे तथाप्यत्र संक्षे
पात्त्रैविध्यमुक्तं प्राणस्त्वेक एव सन् हृदादिनानास्थानवशान्मुखनिर्गमादिनानाक्रियावशाच्च नानासंज्ञां लभते आकाशं निरू
पयति आकाशस्य तु विज्ञेयः शब्दो वैशेषिको गुणः आकाशकालदिशामेकैकव्यक्तित्वादाकाशत्वादिकं न जातिः किंत्वा
~~काशं निरूपयति आकाशस्य तु विज्ञेयः शब्दो वैशेषिको गुणः आकाशकालदिशामेकैकव्यक्तित्वादाकाशत्वादिकं न जातिः~~
५ राज्ञा भयपत्यं किं त्वाकाशत्वं वैशेषिक इति कथनेन विशेषगुणानां तत्रैव वक्ष्यमाणत्वेन प्रमाणमपि दर्शितं तथा हि शब्दो गुणः चक्षुर्ग्रहणा
योग्य बहिरिन्द्रियग्राह्यजातिमत्त्वात् स्पर्शवत् शब्दो द्रव्यसमवेतो गुणत्वात् संयोगवदित्यनुमानेन शब्दस्य द्रव्यसमवेतत्वे
सिद्धे शब्दो न स्पर्शवद्विशेषगुणः अग्निसंयोगासमवायिकारणकत्वाभावे सति अकारणगुणपूर्वकप्रत्यक्षत्वात् सुखवत् पा
तं ४ कजरूपादौ व्यभिचारवारणाय सत्यन्तं यत्र रूपादौ व्यभिचारवारणाय अकारणगुणपूर्वकेति जलपरमाणुरूपादौ व्यभिचारवा
राज्ञो रणाय प्रत्यक्षेति न दिक्कालमनोगुणः विशेषगुणत्वात् गन्धादिवत् व्यतिरेके संयोगवत् नात्मविशेषगुणः बहिरिन्द्रिय
योग्यत्वात् रूपवत् इत्थं च शब्दाधिकरणं नवमं द्रव्यं गगननामकं सिध्यतीति न च वायोरवयवेषु सूक्ष्मशब्दक्रमेण वायोरा स्व
रणगुणपूर्वकः शब्दः उत्पद्यतामिति वाच्यं यावद्द्रव्यभावित्वेन वायुविशेषगुणत्वाभावात् न च शरीरस्य विषयस्य ला०
१२

वा वाभोत इन्द्रियं दर्शयति इन्द्रियमिति नन्वाकाशे लाघवादेकं सिद्धं श्रोत्रं तत्प्रतिपुरुषभेदाद्भिन्नं कथमाकाशं स्यात् अत आह ए
कः सन्निति आकाशः एकः सन्नप्युपाधेः कर्णशष्कुलीभेदाद्भिन्नं भिन्नं श्रोत्रं भवतीत्यर्थः कालं निरूपयति जन्यानां जनक
इति तत्र प्रमाणं दर्शयितुमाह जगतामाश्रय इति इदानीं घट इत्यादिप्रतीतिः सूर्यपरिस्पन्दादिकं यदा विषयीकरोति तदा सू
र्यपरिस्पन्दादिना घटादेः संबन्धो वाच्यः स च संयोगादि न संभवतीति कालस्यैव संबन्धघटकः कल्प्यते इत्थं च जन्यमात्राश्रयत्व
मेव सम्यक् प्रमाणान्तरं दर्शयति परापरत्वेति परत्वादिहेतुः साधारणनिमित्तं काल एव परत्वापरत्वयोः समवायिकारणसं २
योगाश्रयो विनिगमनाविरहात् लाघवादतिरिक्तकालकल्पनमिति भावः नन्वेकस्य कालस्य सिद्धौ क्षणदिनमासवर्षादिसम
यभेदो न स्यादत आह उपाधिभेदादिति कालस्त्वेकोऽप्युपाधिभेदात्क्षणा दिव्यवहारविषयः उपाधिस्तु स्वजन्यविभागप्रागभा स्व
वावच्छिन्नकर्म पूर्वसंयोगावच्छिन्नविभागो वा पूर्वसंयोगनाशावच्छिन्नोत्तरसंयोगप्रागभावो वा उत्तरसंयोगावच्छिन्नक
ध्य३ र्म वा न चोत्तरसंयोगानन्तरं क्षणव्यवहारो न स्यादिति वाच्यं कर्मान्तरस्य सत्त्वादिति महाप्रलये क्षणादिव्यवहारो यद्यस्ति तदा ध्वंसना
ठ२ यस्य ध्वंसेनैवोपपादनीय इति दिशं निरूपयति दूरान्तिकेति दूरत्वमन्तिकत्वं च दैशिकं परत्वापरत्वं चैव बोध्यं तद्द्वारा साधा ठ२
रणं निमित्तं दिग्वैदेशिकपरत्वापरत्वयोरसमवायिकारणसंयोगाश्रयतया दिक् सिध्यतीति भावः नन्वेकैव दिक् कुपदिन् प्राच्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऽप्र

१३ रिव्यवहारः कथमसंघोत[redacted]नत्र्याह उपाधीनियत्सरूपस्योऽस्यगिरिसन्निहितायादिक्त[redacted]त्सरूपस्यसाक्षाची एवंउदयगिरि
मवहितोचप्रतीची एवंतत्सरूपीयमुमेरुसन्निहितादिगुदीचीतव्यवहितात्ववाची सर्वेषामेववर्षाणांमेरुरुत्तरतःस्थितत्वा
न्नियमात् आत्मानंनिरूपयति आत्मेंद्रियेति आत्मत्वजातिस्तत्सुखदुःखादिसमवायिकारणतावच्छेदकतयासि
ध्यति ईश्वरेपिसाजातिरस्त्येव अदृष्टादिरूपकारणाभावान्नतस्यसुखदुःखाद्युत्पत्तिः नित्यस्यतस्यसुरूपयोगेपत्वेफलावश्यंभावस्
सा स्याप्रयोजकत्वात् अपरेत्वीश्वरेजातिर्नास्त्येवप्रमाणाभावात् नचदशमंद्रव्यंत्वापत्तिःज्ञानवत्त्वेनविभजनादित्याहुः इं
द्रियादेरिति अधिःष्ठाता इंद्रियाणांशरीरस्यचपरंपरयाचैतन्यसंपादकः यद्यप्यात्मन्यहंजानेहंसुखीत्यादिप्रत्यक्षविषयत्व
मस्त्येवतथापिविप्रतिपन्नंप्रथमतएवशरीरादिभिन्नत्वेनज्ञातुंतिगोचरइतिप्रतिपादयितुंनशक्यतइति अत्रप्रमाणंदर्शयति
करणंहीति वास्यादीनांछिदा[redacted]दिकरणानांकर्तारमंतरेणफलानुपधानंदृष्टंएवंचक्षुरादीनांज्ञानकरणानामपिफलोपधा
नंकर्तारमंतरेणानोपपद्यतइतितदतिरिक्तःकर्ताकल्प्यते ननुशरीरस्येवकर्तृत्वमस्त्वतआहशरीरस्येति ननुचैतन्यंज्ञानादिक
मेवमुक्तात्मनोत्वेन्मतइवमतःशरीराणामपितदभावःकाह्यानिःप्राणाभावेनज्ञानाभावस्यसिद्धेरितिचेन्न शरीरस्यचैतन्ये
बाल्येविलोकितस्यस्थविरेस्मरणानुपपत्तेःशरीराणामवयवोपचयापचयैरुत्पादविनाशशालित्वात् नचपूर्वशरीरोत्पन्नसंस्का एम०

प१ १३

संस्कारैर्नाशाद्वा ३

रेणद्वितीयेसंस्कारउत्पद्यतइतिवाच्यंअनेकसंस्कारकल्पनायांगौरवात् एवंशरीरस्यचैतन्येबालकस्यस्तनपानेप्रवृत्तिर्नस्यात्
इष्टसाधनताज्ञानस्य तद्धेतुत्वात्तदानीमि ष्टसाधनत्वानुभावक[redacted]भावात् मन्मतेतुजन्मांतरानुभूतेष्टसाधनत्वस्यतदा
नींस्मरणादेवप्रवृत्तिः नचजन्मांतरानुभूतमन्यदपिस्मर्यतामितिवाच्यं उद्बोधकाभावात् अत्रत्वनाद्यस्याजीवनादृष्टमेवोद्बोधकंक तां ३
ल्पते इत्थंचसंसारस्यानादितयात्मनोनादित्वसिद्धावनादिभावस्यनाशासंभवान्नित्यत्वंसंभवतीतिबोध्यं ननुचक्षुरादीनामे
वज्ञानादौकरणत्वंकर्तृत्वंचास्तुविरोधेप्राधकाभावादतआहतथात्वेचेदिति तथात्वंचेतनत्वंतपश्चात्तेविनाशेसतीत्यर्थ घी
चक्षुरादीनामेवंकथमितिपूर्वंचक्षुषासाक्षात्कृतानांचक्षुषोभावेस्मरणंनस्यात् अनुभवितुरभावादन्येनानुभूतस्यान्ये
नस्मरणासंभवात् अनुभवस्मरणयोः सामानाधिकरण्येनकार्यकारणभावादितिभावः ननुचक्षुरादीनांचैतन्यंमास्तुमनस
स्तुनित्यस्यचैतन्यंस्यादतआह मनोपीति नतथानिचेतनमित्यर्थः ज्ञानादीतिमनसोणुत्वात्प्रत्यक्षेचमहत्त्वस्यहेतुत्वात्मन
सि ज्ञानसुखादिसत्वेतत्प्रत्यक्षानुपपत्तेरित्यर्थः यथाचमनसोणुत्वंतथाग्रेवक्ष्यते नन्वस्तुविज्ञानमेवात्मा तस्यस्वतःप्रका
शरूपत्वाच्चेतनत्वं ज्ञानसुखादिकंतुतस्यैवाकारविशेषस्तस्यापिभावत्वादेवक्षणिकत्वंपूर्वपूर्वविज्ञानस्योत्तरोत्तरविज्ञानहेतुत्वा
त् सुषुप्तावप्यालयविज्ञानधारानिराबाधैवमृगमदवासनावासितवसनइवपूर्वपूर्वविज्ञानजनितसंस्काराणामुत्तरोत्तरवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रकाशत्वज्ञानत्वस्य विषयत्वव्याप्यत्वा
वृत्तिभाव=२

मु॰त्री॰ विज्ञाने संक्रान्तत्वान्नानुपपत्तिः स्मरणादेरिति चेन्न तस्य हि ज्ञानगद्विषयत्वे [redacted] सर्वज्ञत्वापत्तेः यत्किंचिद्विषयत्वेवि
१५ निगमकाभावं तथा सति विषयावभासप्रसंगस्तु तदानीं निराकारचित्संततिरनुवर्तते इति चेन्न तस्याः प्रकाशत्वे प्रमाणाभा
वात् अन्यथा घटादीनामपि ज्ञानत्वापत्तिर्न चेष्टापत्तिः विज्ञानव्यतिरिक्तवस्तुनोभावादिति वाच्यं घटादेरनुभूयमानस्यापल
पितुमशक्यत्वात् आकारविशेषस्यैवायं विज्ञानस्येति चेन्न किंमयमाकारो निरूप्यते विज्ञानात्तर्हि समायातं विज्ञानव्यतिरि
क्तेन नातिरिच्यते चेन्न हि मम हालंबनेनीलाकारोपि पीताकारः स्यात् तत्स्वरूपतो विज्ञानस्याविशेषात् अपोहरूपो नीलत्वादि
र्विज्ञानधर्म इति चेन्न नीलत्वादीनां विरुद्धानामेकस्मिन्नसमावेशात् तत्तस्थाविरोधावधारणापि वहुरूपपाद■त्वात् न
वा वासनायाः संक्रमः संभवति मातृपुत्रयोरपि वासनासंक्रमप्रसंगात् न चोपादानोपादेयभावो नियामक इति वाच्यं वा
नय ४ सनायाः संक्रमासंभवात् गंगन्नरस्मिन्नुत्पत्तिरेव संक्रम इति चेन्न तदुत्पादकाभावात् विनाशेवोत्पादकत्वे संस्कारानंत्यप्र
संगः क्षणिकविज्ञाने धृतिशयविशेषं कल्प्यत इति चेन्न मानाभावात् कल्पनागौरवाच्च एतेन क्षणिकशरीरेष्वेवं चेतनत्वम
द ४२ पि प्रत्युक्तं गौरवातिशयमानाभावाच्च वीजादावपि सहकारिसमवधानासमवधानाभ्यामेवोपपत्तेः कुर्वद्रूपत्वाकल्पना
त् अन्यत्र हि क्षणिकविज्ञाने गौरवात्क्लिसविज्ञानमेवात्मा अविनाशी वा अरेऽयमात्मा सत्संज्ञानमनेन ■■ ब्रह्मेत्यादिश्रु एम॰
१५

श्रुतिरिति चेन्न तस्य सविषयत्वासंभवस्य दर्शितत्वान्निर्विषयस्य ज्ञानत्वे मानाभावात् सविषयकस्यापि ध्रुवत्वानुभवात्तो ज्ञानभि
न्नो नित्य आत्मेति सिद्धं सत्यं ज्ञानमिति त्वब्रह्मपरं तो विष्णुनाययुज्यते ज्ञानाज्ञानसुखित्वदुःखित्वादिभिर्जीवानां भेदसिद्धेश्च
तरामीश्वरभेदः अन्यथा बंधमोक्षानुपपत्तेः घोपीश्वराभेदवोधकोवेदः सोपि तदभेदेन तदीयत्वं प्रतिपादयन्स्तौति अभे
१७ दभावनयैव यतितव्यमिति वदति अत एव सर्वात्मनः समर्पित इति श्रूयते मोक्षदशायामज्ञाननिवृत्तावभेदो जायत
इत्यपि न भेदस्य नित्यत्वेन नाशायोगात् भेदनाशेपि व्यक्तिद्वयं स्यादेवेनैव हित्वमपि नश्यती■ति वाच्यं तत्र निर्धर्म
के ब्रह्मणि सत्यत्वाभावेपि सत्यस्वरूपं तदीति वद्वित्वाभावेपि द्वयात्मकौ तौ विति स्वव्यवस्थात् मिथ्यात्वाभावो धिकरणात्म
कस्तत्र सत्यत्वमिति चेत् एकत्वाभावो व्यक्तिद्वयात्मको द्वित्वमिति संमुचतां प्रत्येकमेकत्वेपि पृथिवीजलयोर्न गंधवत्वमिति व
दुभयं नैकमिति सर्वज्ञत्वमिति द्वित्वात् योपि तदानीमभेदश्रुतिः यादवकत्वागमः सोपि निर्दुःखत्वादिना साम्यं प्रतिपादय
ति संपदाधिक्ये पुरोहितोयं राजा संवृत्त इतिवत् अत एव निरंजनः परमं साम्यमुपैतीति श्रुतिः ईश्वरोपि ज्ञानसुखात्मा कि
तु ज्ञानाश्रयो नित्यं विज्ञानमानंदं ब्रह्मेत्यादौ विज्ञानपदेन ज्ञानाधारत्वं यस्य वोक्तः यः सर्वज्ञस्सोघनुरोधादानंदमित्य
स्याप्यानंदवदित्यर्थः अशोहित्वात्मस्वैर्थीयायात्पयात् अन्यथा उद्विग्नत्वापत्तेः आनंदोपि दुःखाभावेनोपचर्यते भा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मु०ली० १५

घपगमेसखीसंहत्तोऽहमितिवत् दुःखाभावेनसुख प्रसयान्नसुखवात्स्मिन्लानंदेनत्वसावानंदः सुखमिति श्रुतेः नविद्यतेऽस्
स्वपसेति कुतो नाथीऽतिचेन्न क्लिष्टकल्पनापत्तेः प्रकरणविरोधाच्च आर नैमित्तत्रमत्वर्थीयाचप्रस्तविरोधाच्चेतिसंक्षेपः ए
तेनप्रकृतेः कर्तृत्वेऽस्याः पक्षस्यलाशवन्निर्लेपः किंतचेतनेः कार्यकारणयोरभेदात्कार्यनाशेसतिकार्यरूपतयानाशोऽपि न
स्यादित्यकारणत्वंनस्य बुद्धिगतचैतन्याभिमानान्यथानुपपत्त्यानत्वात्मने बुद्धिश्चप्रकृतेःपरिणामः सैवमहत्तत्वमतः करण
भित्युच्यते तन्मेलासत्वात्संपादकत्वेसंसारापवर्गौनस्याताम् वेंद्रियप्रणालिकयापरिणतिर्ज्ञानरूपाघटादिनासंबंधः पुरु
षेकर्तृत्वाभिमानो बुद्धौचैतन्याभिमान श्वभेदाग्रहात् ममेदंकर्तव्यमिति मदंशः पुरुषोपरागो बुद्धेः स्वच्छतयातत्त्वतिवि चेतन
वात्तात्विकोऽयंएयस्वेवमुखेपरागरूपमितिविषयोपरागइंद्रियप्रणालिकयापरिणतिभेदात्तात्विकः निश्चयाभिहत्त्वयं
वे णसेवमलिनिमा कर्तव्यमितिव्यापारोंऽशः तेनांशत्रयवतीबुद्धिः तत्परिणामेनज्ञानेनपुरुषस्यातात्विकःसंबंधः इयीनाम
लिन्नेवमुखेर्प्सुपलब्धिरुच्यते ज्ञानवत्सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मास्त्रपिबुद्धेरेव [illegible] तिसामानाधिकरण्येनप्रती
तेः नचबुद्धिश्चेतनायरिणामिलादितिमतमयात् सांख्यात् इष्टभोगानाभिवचेतृतन्यस्यापिसामानाधिकरणप्रतीतिरस्त्विति
परिसा मितात्वे मानाभावात् ^ चेतनोऽहंकरोमीतिप्रतीते चैतन्यांशेभ्रमइति चेतनोऽहमंशे किंनेष्यते भ्रमयाबुद्धेर्नित्यत्वेमोक्षोऽभावेऽच्यनित्यत्वे एम० १५

परात्मानुमीयते इत्याह ६

त्यात्

तन्नपुंसंसारापत्तिः अचेतनायाःप्रकृतेःकार्यबुद्धेश्चैतन्यंकार्यकारणयोस्तादात्म्यादितिचेन्न असिद्धेः कर्तुर्जन्यत्वेनानाभा
वात् वीतरागजन्मादर्शनात्स्त्वनादेर्नाशासंभवान्नित्यस्तत्विं किंप्रकृत्यादिकल्पनेन नचप्रकृतेर्निष्क्रियमाणनिर्गुणःक
र्माणिसर्वशः अहंकारविमूढात्माकर्ताहमितिमन्यते इत्यनेनविरोधइतिवाच्यं प्रकृतेर्गृह्यमाणगुणैरहमितिजन्मेरिच्छादिभिः कर्ता य
हमेवेत्यस्यार्थत्वात् एवंसतिकर्तारमात्मानंकेवलंतुयः इत्यादिवदताभगवताप्रकृतेः कर्तृत्वमुपरिष्टान्निरस्यत इतिसंक्षेपः ध
माधर्माश्रयइति आत्मैत्यनुषज्यते शरीरस्यतदाश्रयत्वेदेहांतरकृतकर्मणांदेहांतरेणभोगानुपपत्तेः [redacted] विशेषगुण
स्पृष्टानसुखादे योगात्तइति योऽपविशेषगुणसंबंधेनात्मनः प्रत्यक्षंभवतिनत्वन्यथा अहंज्ञानेनहंकरोमीतिप्रतीतेः प्रत्यक्षोऽपि आत्मापर
देहादौप्रवृत्त्यादिनानुमीयते प्रवृत्तिस्त्वचेष्टा ज्ञानेच्छाप्रयत्नादीनांदेहेऽभावस्योक्तत्वात्चेष्टायाःप्रयत्नसाध्यत्वाच्चेष्टया
प्रयत्नवानात्मानुमीयतइतिभावः तत्रदृष्टांतमाह रथेति यथापिरथकर्मचेष्टानभवतितथापितेनकर्मणासारथिर्यथानुमी
यतेतथाचेष्टात्मकेनकर्मणायरात्मायीतिभावः अहंकारस्येतिअहंकारोऽहमितिप्रत्ययस्तस्याश्रयोविषयःआत्मानशरी
रि रादिरिति मनइति मनोभिन्नेंद्रियजन्यप्रत्यक्षाविषयोमानसप्रत्यक्षविषय इत्यर्थः रूपाद्यभावेनेंद्रियांतरायोग्यत्वात्
विभुरिति विभुत्वंपरममहत्परिमाणवत्वंतच्चसर्वमूर्तसंयोगित्वम् अर्थमुक्तंबुध्यादिमत्तिबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नाश्चगुणा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुली॰ एवमुक्तावेदितयाः अत्रैव प्रसंगाद्बुद्धेः कतिपयं प्रपंचं दर्शयति बुद्धिस्तु द्विविधेति द्वैविध्यमुपपादयति अनुभूतिरिति प्रत्यक्षमिति
